1353

M. T. B. COLLEGE, SURAT

Manuscripts Library

No Ref.
Ser. 611

Title: Kāraka-viveçana

611

611

incomplete

C

Kāraka-vivecana	Title
Bhavānanda	Author
	Editor
	Year, Vols.
	Publisher
611	Remarks

Enos Abernethy

घटं करोतीत्यादौ घटस्य विषयत्वरूपनिमन्वयार्थद्वारा यत्नरूपक्रिया। न्वयित्वं न गौरवं कर्मत्वापि घटस्यासिद्धत्वान्न मुख्यकर्मत्वमित्याशयः ४

का॰ न॰
१

॥श्रीगणेशाय नमः॥ नत्वा हरिपदद्वंद्वं कारकाद्यर्थनिर्णयः। श्रीभवानंदसिद्धांतवागीशेन प्रकाश्यते ॥१॥
तत्र क्रियानिमित्तत्वं कारकत्वमिति सामान्यलक्षणं संप्रदानादेरनुमतिप्रकाशनद्वारेण तंदुलादिसंपादन
द्वारा संबंधिनोपि पाकादिक्रियानिमित्तत्वेन संबंधिचैत्रस्य तंडुलं पचतीत्यादौ अ आरायतिव्याप्तेः किंतु वि
भक्त्यर्थद्वारा क्रियान्वयित्वं मुख्यं तच्च साधारणं कारकत्वं क्रियानिमित्तत्वं सहितं मुख्यमिति स्तोकं पचतीत्या
दौ क्रियाविशेषणे तिव्याप्तिवारणाय विभक्त्यर्थद्वारेति। चैत्रस्य पचतीत्यादौ चैत्रसंबंधित्वं पाकेनान्वेति।
षष्ठ्यानामार्थे साकांक्षया क्रियया। अपि कर्मादिसाकांक्षतया परस्पराकांक्षाविरहात् किंतु तंडुलमित्या
दिपदाध्याहारेण चैत्रस्य तंडुलं पचतीत्येव प्रत्ययबोधः ओदनस्य भोक्ता चैत्रस्य पाक इत्यादौ षष्ठ्याः कर्म
त्वकर्तृत्वार्थकत्वेन कारकविभक्तेरेव कर्तृकर्मणोः कृतीत्यनेन तद्विधानात् अत एव संबंधस्य कारकत्वं नास्ति
क्रियायोगाभावे तु नेशानिका यदि वगुरु विप्रलपत्विदुर्गतानां प्रतिकुर्वीत मेषकं स्वमेव धनेरित्यादिप्रयोगे
विना मार्याध्याहारं धात्वर्थे षष्ठ्यर्थसंबंधोन्वीयते। तदा कर्तृत्वकर्मत्वघटकान्वयित्वं कारकत्वमिति तु मत
त्वे तत्र क्रियाश्रयत्वं कर्तृत्वमिति वैयाकरणाः तेषामयमाशयः प्रकृतानूक्त्यादिना यगाद्यसमभिव्याहृते तय
धात्वर्थान्वितयद्धर्मवत्त्वं बोध्यते तादृशधर्मवत्त्वमेव तत्क्रियाकर्तृत्वं एवं पचतीत्यादौ पाकानुकूलव्यापारवत्त्वं
जानातीत्यादौ स्वाश्रयत्वं नश्यतीत्यादौ प्रतियोगित्वं ततः क्रियानिरूपितत्वं तत् कर्तृत्वं यगाद्यसम

टनीयारूपप्रत्य मारूपं तस्यार्थ कत्वात् ४

तान्नक्ष्मीरस्तु कुरुतेत्यपरे वापद ५

रामः
१

तसं २

चैत्रमनेकव्याख्यानमेवेदं ४। अत्र कर्मणः कर्तृत्वविवक्षायां अल्पपदादिविधानं कर्मवत्कर्मणा तुल्यक्रिय इत्यादिसूत्रेण कर्तृत्वोपपादनं चात्मनेपदं पच्यते कालीन पचतीति प्रयोगमादायोपपादयति तत्रेत्यादिना। आत्मनेपदस्याकर्तृकत्वेन तन्नीयेभ्यपि वोध्यम् ६

भिव्याहृते तु करणात् पच्यते तंडुल इत्यादौ पाकजन्यफलाश्रयत्वे तंडुलादेर्विधानात् न कर्तृत्वं काष्ठैः स्था
ल्यां ओदनं पचतीत्यादौ ~~[illegible]~~ करणाधिकरणकर्मणां क्रियान्वितत्तद्धर्मवत्त्वेपि सधर्मान्ना
ख्यानेन प्रतिपाद्यः यदा च तद्व्यापारतात्पर्येण ओदनः स्वयं पच्यते काष्ठं पचति स्थाली पचतीत्यादौ तदा ते
षां कर्तृत्वमिष्टमेव तथा च पच्यते ओदनः स्वयमेवेत्यादौ कर्मकर्तरि ओदनादेः कर्मणोपि कर्तृत्वं तत्र हि
स्वचालिव्यापारजन्यपाकजन्यफलशाल्योदन इति ओदनपदोत्तरप्रथमायाः व्यापार एव लक्षणार्थः यद्वा
व्यापारसामान्यशक्तस्याख्यातस्यार्थः व्युत्पत्तिवैचित्र्यात् अत्र यगादेः समभिव्याहृताख्यातार्थव्यापारे
प्रथमार्थस्य विशेषणतया धात्वर्थस्य विशेषणतया चान्वयः तेनाख्यातस्य व्यापारबोधकत्वात् ओदना
न्वितनादृशव्यापारस्यापि यगाद्यसमभिव्याहृताख्यातार्थप्रतिपाद्यत्वात् ओदनस्य पचतीति प्रयो
गस्यासाधुतया अभावेपि तादृशव्यापारेण तज्जन्यप्रतिपत्तिविषयतया योग्यतया अत एवादिति पाच
नीत्यादौ पाकानुकूलव्यापारो णिजर्थः तदनुकूलव्यापारश्चाख्यातस्य तत्र तदाश्रय एव कर्तेति स्वतंत्रः कर्ता
निपातेन सिद्धत्वमेपि अपरं परसमेत व्याख्यायाम् तेन अचेतनेऽप्युक्तानां तथाऽसतः कर्तृपदप्रयोगात् कारको
तत्प्रयोज्यत्वे सति कारकांतरप्रयोजकत्वं कर्तृत्वं सत्यंतात् घटस्य संयोगादिरूपव्यापारजनककुठारादौ ना
तिव्याप्तिरित्यपरेति तदप्यसत् ईश्वरस्याख्यातासंसारिणां तत्र क्रियास्वकर्तृत्वापत्तेः अप्रयोज्यत्वं च

समभिव्याहृतक्रियाकारकपक्षे ईश्वरत्याले कारकांतरे त्यज कृतस्याव्छिन्नभेदनिवेशेन तत्रोक्ताव्याप्तिरत आह यथाकृते पूर्वोक्तस्यापि सत्वमिति भावः =

यदि फलानुकूलतज्जन्यव्यापाराश्रयत्वं तदा दंडादिजन्यसंयोगादिरूपव्यापाराश्रयत्वात् कुलालादाव
प्यापत्तिरन्यच्च दुर्वचमिति अत्राहुः अनुकूलकृतिमत्त्वं कर्तृत्वं पाकानुकूलव्यापारत्वप्रतिसंधानेपि काष्ठा
दौ तांत्रिकाणां स्वरसतः कर्तृपदाप्रयोगात् कृता कृतव्यवहारादिना कृधातोर्यत्नार्थकत्वनिश्चितेः आश्रयत्वा
र्थकत्वं जनकधातुनाव्युत्पन्नकर्तृपदस्य यत्नाश्रयबोधकत्वाच्च अचेतने कर्तृपदप्रयोगो गौणः यदि चान्य
४. विषयकृतिजन्येनांतरीयकेमनोऽकृतं ननु मया कृतमिति व्यपदेशात् कर्तृत्वं तदा तद्विषयत्वेनापि कृति गृहेस्थता
विशेषणीया न चैवं तद्विषयकृतिमत्त्वमेव तत्कर्तृत्वमेवास्तु गुरुतरभारोत्तोलनादौ तद्विषयकृतिसत्त्वे
पि तोलनक्रियायामनिष्पन्नायां कर्तृपदाप्रयोगात् विषयत्वं च साध्यत्वेन बोध्यं तेन ज्ञानकृते द्वेश्यत्वेन जं
सुखादि विषयकत्वमपि न तत्कर्तृत्वं न मुख्यकर्तृत्वं अस्मदादिकृतेः कपाकादावपि ईश्वरस्य कर्तृत्वमिष्टमेव नन्वे र्तृत्व
वमीश्वरः पचतीति स्यात् तथा विवक्षायामिष्टत्वात् केचित्तु कार्यत्वावच्छिन्नजन्यतानिरूपि
तमसाधारणत्वमेव घटकमित्याहुः कर्तृत्वं तु न करणव्यापार्यत्वं तद्धि करणजन्यक्रियानुकूलव्यापा
राश्रयत्वं न त्वहरानेण धान्यं लुनातीत्यादौ हस्तादिकरणव्यापार्यदात्रेऽतिव्याप्तिः नापि परसमवेतक्रिया
जन्यफलशालित्वं गमिपत्योः कर्मत्वस्य पृथ्वीस्मिन्देशे त्यजेग्रामं स्पंदादौ अपूर्वापत्त्योः प्रसंगा
त् नदीं वर्द्धतीत्यादौ वृद्धेरवयवोपचयस्य परंपरया तीरप्राप्तिकत्वात् तज्जन्यफलाश्रये तीरेऽतिव्या त्यागः
२

ईश्वरो वदो लिर इत्यादौ कार्यत्वावच्छिन्नकार्यतानाधायादेः निष्ठविषयकार्यतामादाय कर्तृत्वोपपत्तिरिति बोध्यम् ४

तथा च प्रकृते विषयतात्वव्याप्यउद्देश्यताविषयतात्वेनेति न कर्मत्वेन तु तेन तथात्वे एव सकर्मकत्वमिति बोध्यम् ८

प्तिरिति अत्राहुः त्यजिगमिप्रभृतीनां स्पंदमात्रमर्थः न हि त्यजति गच्छतीत्यनयोर्विशेषः कश्चिदस्त्यपि तु
एवं त्यजेर्विभागेन गमेश्च उत्तरसंयोगेन पतेरधःसंयोगेनावच्छिन्नः स्पंदो वाच्यः तथा च तत्तद्धात्वर्थतावच्छेदक
फलशालित्वं तत्तद्धात्वर्थकर्मत्वं स्पंदेर्वर्द्धधातोश्च फलावच्छिन्नव्यापारबोधकत्वात् न पूर्वापत्त्योस्तीरस्य
च कर्मत्वं फलावच्छिन्नव्यापारबोधकत्वादेव धातूनां सकर्मकत्वव्यवहारो मुख्यः सविषयपदार्थाभिधायिज्ञाना
त्यादेः विषयत्वविशिष्टार्थद्वारा नामार्थान्वयित्वमेव गौणं सकर्मकत्वं घटं जानातीत्यादौ द्वितीयार्थेन विष
यत्वोपस्थितेः घटविषयिज्ञानाश्रयवान् इत्यन्वयबोधात् अत एव यत्नधातोरकर्मकत्वं तदुपस्थितेन यत्न
नामार्थस्यापि देशत्वेनैवान्वयबोधात् अभुंजानेपि भोजनाय यतते प्रयोगात् अत एव नाहवराधातुर्योगे स्तिः
न पि प्रत्ययाभावात् भोजनं यतते इति प्रयोगः नत्र भूमिं प्रयातीति कृत्यज निरवद्य इत्यादौ धात्वर्थतावच्छे
दकसंयोगविभागादिरूपफलशालित्वेपि स्वस्थं स्वात्मानं प्रयाति त्यजतीत्यप्रयोगात् धात्वर्थपर
समवेतत्वमपि विशेषणं देयं न च वं उभयकर्मजस्थले महल्लो महत्नं गयं छतीतिवत् महत्वं स्वात्मानं गच्छ
तीति प्रयोगः स्यात् भूमिं प्रयातीत्यादितोऽधिहि द्वितीयादितात्पर्यं प्रकृत्यर्थापेक्षितं बोध्यं ते तथा च भूमितीव्र
समवेत भूमिवृत्ति संयोगजनकस्पंदानुकूलकृतिमान् इत्यन्वयबोधः स्वात्मानं गच्छतीत्यादौ स्वात्म
भिन्नसमवेतस्वात्मवृत्तिसंयोगजनकस्पंदं ध्यानरूपमनं तदनुकूल कृतिमत्त्वस्य स्वस्मिन्नभावेनानति
कूल

प्रसंगात् अत्र प्रकृत्यर्थस्यान्वयितावच्छेदकावच्छिन्नप्रतियोगिताकत्वसंबंधेन परत्वेऽन्वयः पृथिवीं प्रया
ति विहग इत्यादौ विहगस्य पृथिवीत्वावच्छिन्नभिन्नत्वाभावात् अनन्वयापत्तेः प्रतियोगितामात्रेणान्व
येऽप्यात्मनोऽपि स्वप्रतियोगिकद्वित्वावच्छिन्नभिन्नत्वाभावात् तथैव दोषात् अतो द्वितीयार्थफलस्य चैत्रेऽन्व र्थ
यस्तच्छालित्वावच्छिन्नप्रतियोगिताकसंबंधेन फलस्य कर्मत्वान्तार्थफलान्वयिन अपरत्वेऽन्वयः पृथिवीं प्रया
तीत्यादौ च पृथिवीवृत्तिसंयोगजनकत्वं प्रयाणस्य गृहं यत्तच्छालिभिन्नत्वे विहगे वर्त्तत इति
न कोऽपि दोषः पृथिवीं प्रयातीत्यादौ भूखंडस्येव पृथिवीपदार्थत्वात् ननु वृक्षविलग्नसाधारणपृथिवीत्वजा
त्यवच्छिन्नस्य तथात्वान्वयितावच्छेदकावच्छिन्नप्रतियोगिताकत्वस्य युक्तत्वादपि लक्षणेति चेत्तदन्
न्यत्रापि कर्मवाचकसामान्यपदे लक्षणया विशेषपरत्वस्योपपन्नत्वादित्याहुः यत्तु क्रियानधिकरणत्वे
सति क्रियावच्छेदकफलशालित्वं कर्मत्वं द्वितीयादेरपि क्रियानधिकरणत्वमर्थ इति तत्तत्क्रियाश्रय
भेदात् अनेन शाब्दिकल्पनापत्तेः तत्त्वतस्तु अन्योन्याभावप्रतियोगितावच्छेदकत्वे क्रियान्वयि द्वि
तीयादेरर्थः तथा च द्वितीयाद्यर्थफलपदार्थैकदेशे अन्योन्याभावे च एकत्वप्रकृत्यर्थस्य धर्मिण्या
तार्थफलान्वयिनश्चाधिकरणत्वेनान्वयः एवं च भूमिं प्रयातीत्यादौ भूमिसंयोगजनकभूमिवृत्त्यन्योन्या
भावप्रतियोगितावच्छेदकप्रयाणानुकूलकृतिमानित्यन्वयधीः आत्मत्वशालिक्रियायाश्चत्वन्योन्याभा रामः

३

अत्रापि तुमिम द्वितीयानुपपत्तिः पशुना रुद्रं यजते इत्यादावपि कर्मणः करणसंज्ञा संप्रदानस्य कर्मसंज्ञेति व्याप्तिदेनेति बोध्यम्

वप्रतियोगितानवच्छेदकत्वात् स्वात्मानं प्रयातीत्यादौ न प्रयोगः एवं ददातेर्मूल्यग्रहणं विना स्वस्वत्वध्वंस
पूर्वकपरस्वत्वोत्पत्त्यवच्छिन्नत्यागो दानं यजतेर्देवतोद्देशकस्वस्वत्वध्वंसफलकत्यागः जुहोतेरेतादृश
फलकाग्निप्रक्षेपः अत एव स्वत्वाजननादृशत्यागाभावेऽपि हुतत्वं अग्निप्रक्षेपस्याग्निवृत्तिसंयोगानुकू
लघृतादिचलनोदनादिव्यापारः न चैवं वह्नौ जुहुयादित्यत्र अग्निवृत्तिसंयोगानुकूलक्रियेत्यादिशाब्द
न बोधे पुनरुक्तिनिबंधनोऽन्वयः धात्वर्थतावच्छेदकसंयोगात्मकफलशालित्वेन अग्नेरपि कर्मत्वापत्तिरिति
अग्नेरपि वे वाच्यं अत्र संयोगानुकूलव्यापारस्यैव धात्वर्थतया आद्यदोषाभावात् अत्र क्रियाया एव धात्वर्थतावच्छे
रणं तु दकतया संयोगस्य अनवच्छेदकावच्छिन्नतयाऽन्वयिनोऽप्यग्नेः कर्मत्वासंभवेन द्वितीयदोषस्याप्यभावात्
द्वितीयार्थफलशालित्वं तच्च धात्वर्थतावच्छेदकफलेऽन्वेति विप्राय गां ददाति विष्णुं यजते घृतं जुहोतीत्या
दौ विप्रोद्देश्यकगोवृत्तिस्वस्वत्वध्वंसपूर्वकपरस्वत्वोत्पत्त्यवच्छिन्नत्यागानुकूलकृतिमान् विष्णूद्दे
श्यकस्वस्वत्वध्वंसफलकत्यागानुकूलकृतिमान् घृतवृत्त्यग्निसंयोगावच्छिन्नक्रियानुकूलव्यापारानुकूल
कृतिमान् इति क्रमेणान्वयबोधः अत्र देवतायाः स्वत्वास्वीकारे तन्नाद्वितीयार्थवृत्तित्वान्वयेनैव विष्णोः कर्मत्वम्
इतरथा तु उद्देश्यतासंबंधेन तादृशस्वस्वत्वध्वंसरूपधात्वर्थतावच्छेदकफलशालित्वात् कर्मत्वं अत
एव मंत्रकरणकहविस्त्यागभागीत्येतादृश्यत्वं देवतात्वमिति मीमांसकाः धनस्य जुहोत्यर्थतावच्छेदक

स्वजनकत्यागोद्देश्यत्वं

भूतलाग्निसंयोगानुकूलक्रियावत्त्वात्कर्मत्वं मूल्यग्रहणप्रयुक्तस्वस्वत्वध्वंसपूर्वकपरस्वत्वजनकत्यागो विक्रयः
मूल्यप्रदानपुरःसरस्वस्वत्वोत्पादकस्वीकारः क्रयः दत्तद्रव्यस्वत्वजनकस्वीकारः प्रतिग्रहः तथा च गां विक्रीणा
ति गां क्रीणाति गां प्रतिगृह्णाति इत्यादौ गोवृत्तिमूल्यग्रहणप्रयुक्तस्वस्वत्वध्वंसपूर्वकपरस्वत्वावच्छि
न्नत्यागानुकूलकृतिमान् गोवृत्तिमूल्यप्रदानप्रयुक्तस्वत्वावच्छिन्नस्वीकारवान् गोवृत्तिदानप्रयुक्तस्वस्वत्वज
नकस्वीकारवानिति क्रमेणान्वयधीः सर्वत्र धात्वर्थतावच्छेदकफलाश्रयत्वेन गवादेः कर्मत्वं एवमनयैव दि श्र
शा सर्वत्र कर्मत्वमूह्यं ननु चैवं पतेः अधःसंयोगावच्छिन्नस्पन्दार्थकतया तदवच्छेदकीभूताधःसंयोगवत्त्वाद्भूतला
देः कर्मत्वेन वृक्षात्पर्णं भूमिं पततीत्यादिप्रयोगः स्यादिति वाच्यं तथाविधविवक्षायामिष्टत्वात् अत एव
द्वितीयाश्रितातीतपतितगतात्यस्तप्राप्तापन्नैरित्यादिसूत्रे पतितशब्दप्रयोगो द्वितीयान्तसमासविधानेन
कूपं पतितो नरकं पतित इत्याद्युदाहरणं च साधु संगच्छते क्वचित्सम्प्रत्यपि साधु भूतलं पततीत्य[illegible]प्रयोग ले
श्रूयते इति वत् अन्वये तु तादृशफलशालित्वेऽपि भूतलादेर्नो द्वितीया फलस्य हि संबन्धाकांक्षायां भूतलादेरन्व
योवाच्यः प्रकृते च अधःसंयोगरूपफलस्याधोवृत्तितया उपस्थितेराश्रयान्तरनिराकांक्षत्वात् यद्वा पतिधातो
रकर्मकत्वं कर्तृभिन्नान्वयिफलावच्छिन्नव्यापारबोधकस्यैव धातोः सकर्मकत्वात् यथा ग्रामं गच्छतीत्या
दौ गम्यादेः पतिर्हि विगतमधःसंयोगमेव बोधयति ननु भूतलगतं भूतलस्याधःसंयोगाभावात् धमुः ४

प पर्णस्याधोभूतलमित्यन्वयादिति अत एव भूतले पततीत्येव प्रयोगो न तु भूतलं पततीत्याहुः शेषस्तु ग्रामं
गच्छति त्यजति गम्यते त्यज्यते ग्राम इत्यादौ संयोगविभागयोः फलयोः द्वितीयाकर्माख्याताभ्यां प्रत्याप
नात् अनन्यलभ्यस्पन्दात्मकव्यापार एव तत्र धातोरर्थः न चैवं तदनुयोगे द्वितीयादेः संयोगत्वादि ग
ना फलबोधकत्वोपगमेन ग्रामं गच्छति त्यजतीत्याभ्यां ग्रामवृत्तिसंयोगजनकस्पन्दस्य ग्रामवृत्तिविभा
गजनकस्पन्दस्य च लाभात्पर्यायत्ववारणेऽपि गच्छति त्यजति गमनं त्याग इत्यनयोः पर्यायता स्यादिति वा
च्यं संयोगावच्छिन्नस्पन्दशाब्दत्वस्य गमे विभागावच्छिन्नस्पन्दशाब्दत्वस्य त्यजेश्च कार्यतावच्छेदकत्वात् ए
वं च यथायथं संयोगविभागावच्छिन्नस्पन्दलक्षणं विना गच्छति त्यजतीत्यनयोः अबोधकत्वमेव संयोगा
ञ्चार्थ द्यवच्छिन्नस्पन्दशाब्दत्वं च जन्यजनकभावसंबन्धेन संयोगादिस्पन्दोभयवैशिष्ट्यावगाहिशाब्दत्वं तेन गमन
स्याधा ते त्यज्यते ग्राम इत्यादौ स्पन्दविशेषणककर्माख्यातार्थसंयोगादिविशेष्यकशाब्दस्य च संग्रहः आवाख्याता
तोर्लग र्थे स्थले तु गमनमित्यादौ विकसंयोगाद्यवच्छिन्नस्पन्दे धातोर्लक्षणैव न चैवं लक्षणया त्यजिगम्यो
नुपपत्ति स्त्यागगमनयोरबोधप्रसंग इति वाच्यं शक्तिलक्षणान्यतरसंबन्धेन संयोगाद्यवच्छिन्नस्पन्दबोधकत्वा
रित्यर्थः २ न्यथानुपपत्तिनिर्णयानन्तरमेव गम्यादितो संयोगाद्यवच्छिन्नस्पन्दबोधनात् एवं च परसमवेतत

धात्वर्थान्वयिफलविशेषशालित्वं [illegible] तत्तद्धात्वर्थकर्मत्वं अत एव गमिधातोः पूर्वदेशेक
र्मत्वं तस्य फलविभागरूपफले [illegible] नन्वयात् पतेरपि मुक्त्वा समवायिकारणत्वेपि
न्यविजातीयक्रियेवार्थः तस्या [illegible] धः संयोगरूपफलेनान्वयः एवं वृक्षात्पतत्यादावपि व्यापा
रमात्रार्थत्वं द्वितीयादिनाचतत्त [illegible] फलविशेषान्वयबोधः इत्याहुः कर्म च त्रिविधं प्राप्य
विकार्यं निर्वर्त्यं चेति संयोगादि [illegible] क्रियाफलशालि प्राप्यं यथा ग्रामं गच्छतीत्यादौ क्रियायद्
भेदनाशादिफलं जनयति तद्धि विकार्यं यथा काष्ठं लुनातीत्यत्र काष्ठपदेन लक्षणया अवयवा उच्यन्ते लुनाति
नाशारंभकसंयोगविरोधिविभागहेतुः कुठारादिव्यापारः तथा च काष्ठावयववृत्तिनाशकविभागावच्छि
न्नव्यापारानुकूलकृतिमा [illegible] नित्यन्वयधीः एवं च प्राप्यविकार्ययोः कारकत्वात् तादृशफलाश्रयत्वा
त् मुख्यकर्मत्वं निर्वर्त्यं च निष्पाद्यं यथा कटं घटं करोतीति अत्र कटस्य फलावच्छिन्नव्यापाराबो
धकत्वात् घटादेस्तादृशफलानाश्रयत्वेन गौणं कर्मत्वं तत्र साध्यत्वेन विषयत्वं अत एव तत्र वी
रणादेरुपादानत्वेन विषयत्वेपि वीरणं करोतीति न प्रयोगः प्राचस्तु कटादेर्गौणकर्मत्वेपि का
रकत्वोपपत्यर्थं अवयवे लक्षणया कटस्यासिद्धत्वेनाकारकत्वात् नन्वेवं वीरणं करोतीति मुख्यतः राम.

५

त

प्रयोगः स्यात् इति वाच्यं करोति पदसमभिव्याहारे कर्मवाचकपदस्यावयवे निरूढलक्षणानियमादित्या
हुः ओदनं पचतीत्यादौ ओदनपदस्य तंडुलेऽवयवे वा लक्षणा धातुना च रूपादिपरावृत्ति फलबोधः
संतापनादिरर्थो बोध्यते तथा च धात्वर्थतावच्छेदकरूपादिपरावृत्तिशालित्वात् कर्मत्वं अत्र पूर्वरूपविरो
दिपरा धिरूपान्तरावाप्तिर्यदि विकारस्तदा विकार्यमध्येऽन्यथा तु प्राप्यमध्ये स्यान्न भेदः स्तोकं पचतीत्यादौ त्रि ती
या विशेषणे द्वितीया विशेषणविभक्तिवत्प्रयोगः साधुः धात्वर्थे स्तोकस्य नामार्थस्याभेदः संबंधः नो
मार्थधात्वर्थयोर्भेदान्वयबोध एव प्रकारीभूतविभक्त्यर्थोपस्थितत्वात् नीलं घटमित्यादौ विशे
षणविभक्तेरभेदार्थकत्वेतु न स्यात् अभेदार्थकत्वमिति करणत्वं च कारान्तरे चरितार्थत्वे सति हेतुत्वं कां
तत्र चरितार्थत्वं [illegible] तद्व्यापारमुत्पाद्यैव फलहेतुत्वं कर्तुर्हि सिद्धं कुठारादिव्यापारमन्तरेण छिदानुकूल
तु उत्पादयतीति करणे चरितार्थो निष्फलं कर्मापि च करणे चरितार्थं कर्मसिद्धौ करणव्यापारासिद्धेः न हि काष्ठादि
दौ कुठारादिकरणं नाच्छिदानुकूलव्यापारः संभवति अत एव करणव्यापारविषयत्वं कर्मत्वमिति प्राचः
न अधिकरणमपि कर्तृकर्मोत्पन्नव्यापारद्वारा क्रियानिष्पादकं यथा गेहे चैत्रः स्थाल्यां तंडुलं पचतीत्यत्र चै
त्रव्यापारसंपादनेन गेहस्य तंडुलव्यापारसंपादनेन स्थाल्याः कारकत्वं संप्रदानापादानयोरपि क्रिया
सामान्यहेतुत्वं दानेच्छानुमतिप्रकाशनेन कर्तुरिच्छामुत्पाद्य संप्रदानस्य पतनाश्रये च पत्रादौ पतन

इदं च संयोगस्यैव कारणमित्यभिप्रायेण न हि संयोगव्यापारं पाषाणफलहेतवः २

प्रतिबंधकसंयोगनाशकविभागमुत्पाद्य चायाद्दन्तस्य चरितार्थत्वमेवेति एवं च तदनुकूलव्यापारमद्वारीकृ
त्य तज्जनकत्वं फलायोगव्यवच्छिन्नं कारणत्वं पर्यवसितं करणत्वमिति लब्धं एवं च तन्मते चरमकारणमेव
करणमिति कुठारादौ करणपदं गौणमिति वस्तुतस्तु व्यापारवत्कारणं करणं इति तेन हस्तादौ कुठारादौ
व च नाव्याप्तिः न चैवमदृष्टद्वारा कार्यमात्रे विशेषणतः [illegible] मनोयोगद्वारा आत्मनः कारणत्वापत्तिः उपधेय
संकरस्येष्टत्वात् [illegible] अनुकूलकृतिसमवायित्वलक्षणकर्तृत्वस्य निरूढकरणत्वात् स्यत्वेनैवोपाध्योः संक
रात् करणलक्षणे कर्तृभिन्नत्वेन विशेषणीयमित्यपि कश्चित् इत्थं चानुमितौ व्याप्तिस्मृतिः करणपरामर्शो
व्यापारः चक्षुरादेः चाक्षुषादिज्ञाने चक्षुरादिसंयोगः श्रावणज्ञाने श्रोत्रमनःसंयोगः न तु शब्दो व्यापारः शब्दा
भावप्रत्यक्षे तस्य व्यभिचारात् न च शब्दश्रावणे शब्दो व्यापारः लाघवेन श्रावणत्वावच्छिन्नं प्रत्येव श्रोत्रत्वेन
हेतुत्वात् न तु शब्दश्रावणत्वावच्छिन्नं प्रति गौरवात् [illegible] कुठारादौ करणे कर्तृव्यापारविषयत्वं करणत्वं न तु
फलानुकूलकर्तृव्यापारवत्त्वं कुठारादौ छिदानुकूलकर्तृसंयोगेन तन्मनो न मनआदिमत्त्वमविकलं न चैवं स्त्र्या
दादरादौ करणस्यापि कर्तृव्यापारविषयत्वात्तत्रातिव्याप्तिः उपधेयसंकरस्येष्टत्वात् छिदादौ चेष्टया [illegible]
तत्प्रकर्तृव्यापारविषयत्वेन हस्तादेश्च तज्जन्यचेष्टावत्त्वेन करणत्वमिष्टमेव चेष्टया हस्तादिना च
छिनत्तीति प्रयोगस्य सर्वसंमतत्वात् कर्मादौ विवक्षावशात् प्रयोगो भवत्येव तंडुलेन स्थाल्यां [illegible] राम: ६

साधयति गवा दानं साधयति ब्राह्मणेन दानं साधयतीत्यादिप्रयोगात् चैत्रः आत्मना चैत्रेण वा पचतीत्यप्रयो
इयसत गात् कर्तुः शरीरस्य च वारणाय द्व्यासमवायिकृतिमद्भिन्नत्वं विशेषणं देयं कृतिमत्त्वं समवायेनावच्छेदकतया
दायविरो बोध्यं तेनात्मनः शरीरस्य च व्युदासः विशिष्टाभावात् हस्तादिसंग्रहः इदं च न व्याप्तिलत्यादिसाधारणं तत्पू
त्र. र्वनिरूढमेव करणत्वं इत्थं च करणपदं नानार्थकमेवेत्याहुः परशुना छिनत्तीत्यादौ निष्फलं करणत्वं तत्तृतीयार्थः
प्रकृत्यर्थस्य तत्राश्रयत्वेन तस्य च धात्वर्थच्छिदादौ निरूपकत्वेनान्वयः इत्थं च परशुनिष्ठकरणतानिरूप
कच्छिदानुकूलकृतिमानित्यन्वयधीरिति प्राचः परशुना छिनत्ति दात्रेणेत्यादौ निरूपकत्वादेः संसर्गस्य
वृत्तियोगितावच्छेदकसंबंधत्वाभावात् [illegible] तदर्थान्वयानुरोधेन निरूढकरणतानिरूपितजन्यत्वमेव तृतीया
र्थः तत्र च निरूपकतया [illegible] प्रकृत्यर्थस्याश्रयतया च धात्वर्थस्यान्वयः इत्थं च परशुनिष्ठकरणतानिरूपितजन्यता
श्रयच्छिदानुकूलकृतिमानित्यन्वयधीरिति नव्याः जटाभिस्तापसमद्राक्षीदित्यादौ तृतीयानकरणत्वे किंतु विशे
षणत्वे न च प्रकृते वैशिष्ट्यं जटाभिस्तापसमित्यस्य जटाविशिष्टं तापसमित्यर्थः अत्र चोपलक्षणत्वेनाभि
विरोध धानं उपलक्षणत्वं च बोध्ययादृत्त्यनवच्छेदकत्वे सति तेन सामानाधिकरण्यं जटाया अतापसस्य [illegible]
रत्वेनावच्छेदकत्वात् शमदमादिमत्त्वस्यैव तापसपदप्रवृत्तिनिमित्तत्वेन अतिरिक्तवृत्तित्वेनावच्छेदकत्वात् न चैवं
शमदमादिना तापस इति न स्यात् इष्टत्वात् विवक्षावशात् उक्तप्रयोगस्येष्टत्वे च विशेषणोपलक्षणसा

धारणे वैशिष्ट्यमात्रं न तु उपलक्षणमपि नियामकमिति अक्ष्णा काणः पादेन खंजः मुखेन त्रिलोचन इत्यादौ येनां
गविकार इति सूत्रेण तृतीया येनांगेन विकारो हानिराधिक्यं वा तदंगवाचकात्तृतीयेति सूत्रार्थः इत्थं च तृतीयाया
स्तद्वत्त्वमर्थः व्युत्पत्तिवैचित्र्यात् काणादिपदार्थैकदेशे विकार एवान्वेति काणे चावच्छेदकावच्छेदेन चक्षुःशून्यगो वं
लकवत्त्वं अंधस्य काणत्वाभावेन चक्षुष्मद्गोलकवत्त्वे सतीति विशेषणीयं एकेनाक्ष्णा न पश्यन्
नपि काण एव एकगोलके द्विगोलके वा चक्षुरभावत्वात् गोलकोपधानेन तदवच्छेदेन चक्षुरभावात् इति यदि
च तद्गोलकावच्छेदेन चक्षुःसत्त्वेपि उपघातादेव न तत्र चाक्षुषं तदोपहतगोलकत्वमेव काणत्वं अक्ष्णेति प
दसमभिव्याहारस्थले च काणपदं चक्षुःशून्यत्वविशिष्टस्य उपहतत्वविशिष्टस्य वा बोधकं अक्षिपदं च य
दा कदाचित् चक्षुष्मद्गोलकपरं एवं च तादृशगोलकवृत्ति यच्चक्षुःशून्यत्वमुपघातो वा तद्विशिष्टाभिन्नः काण त
काण इति वाक्यार्थः एवं च खंजत्वं तथाविधसंस्थानशून्यपदत्वं पादेनेत्यादिसमभिव्याहारस्थले तथाविध
संस्थानशून्यत्वविशिष्टत्वमेव खंजपदार्थः तथा च पादवृत्ति यत्तथाविधसंस्थानजनकशून्यत्वं तद्विशिष्टवानि
त्यर्थः त्रिलोचन इत्यस्य बहुव्रीहिणा लोचनत्रयवानित्यर्थः तथा च मुखवृत्तिलोचनत्रयवानिति मुखे
न त्रिलोचन इति वाक्यार्थः एवमन्यत्राप्यूह्यं अक्ष्णा काण इत्यादौ पूर्वनिरुक्त एव पदार्थः तृतीयार्थाने
दे तथा च तादृशगोलकाभिन्नं यच्चक्षुःशून्यं उपहतं वा तद्वानिति वाक्यार्थः मुखेन त्रिलोचन इत्यादौ त्रिलोच रामः
6

न पदं लोचनत्रयविशिष्टवत्परं तथा च मुखाभिन्नलोचनत्रयविशिष्टवानिति वाक्यार्थ इत्यपि केचित् धनेन कु
लमित्यादौ तृतीया हेत्वर्थे कर्तृकरणयोस्तृतीयेत्यत्र क्रियासाकांक्षनिरूढकरणत्वे तृतीया विहिता अत्र तु तं
मार्थत्वापि साकांक्षे हेतुत्वसामान्ये हेतौ विति सूत्रेण तृतीया विहितेति भेदः पुत्रेण सह आगत इत्यादौ तृतीया
याः कर्तृत्वमर्थः समभिव्याहृतक्रियैव सहशब्दार्थः तस्य समभिव्याहृतक्रिया आगमनादि तस्य च एकवृत्त्या
दिरूप एकदेशावच्छेदेन एककालीनत्वसंबंधेन समभिव्याहृतक्रियायामन्वयः एवं च शिष्यकर्तृकागमनस
प. मानदेशकालीनागमनकर्तेत्यन्वयबोधः एवं पुत्रेण सह भुंक्ते इत्यादावप्यूह्यं वस्तुतस्तु सहशब्दस्यापेक्षानु
द्धिविशेषविषयत्वात् साहित्यमेवार्थः तृतीयार्थो वृत्तित्वसंख्यामात्रं वा सहार्थस्य संबंधः प्रथमांतेन तृ
तीयांतेनापि सम वाक्यार्थः निपातातिरिक्तनामार्थयोरभेदान्वयस्य व्युत्पत्तिसिद्धत्वात् साहित्यावच्छेदे
न सर्वत्र विधेयान्वयः एवं च पुत्रेण सहागतः चैत्र इत्यस्य पुत्रवृत्तिसाहित्यावच्छिन्नः चैत्रो गमनकर्ता इत्यन्वयधीः
तेन शिष्येण सहोपाध्यायो ब्राह्मणः सुंदर इत्यादौ द्रव्यगुणविधेयस्थले तादृशान्वयः सहैव दशभिः पुत्रैर्भारं वहति गर्दभी
इत्यादौ पुत्रेषु भारवहनकर्तृत्वाभावेपि तादृशप्रयोगात् एकदेशाविद्यमानेत्यभिव्याहारेण एकदेशे विद्यमान
तायां पुत्रसाहित्यस्यावच्छेदकतयान्वयः अत एवात्र विद्यमानसहार्थे तृतीयेति शाब्दिका वदंति धान्येन धनवा
न् गोत्रेण गार्ग्यः प्रकृत्याभिरूपः इत्यादौ प्रकृत्यादिभ्य उपसंख्यानेन तृतीया अभेदार्थिका धान्याभिन्नधनवानि

त्तिं गार्ग्यो गर्गकुलोत्पन्नः गोत्राभिन्नगर्गकुलोत्पन्न इति प्रकृतिपदस्य साहजिकोऽभिरूपपदस्य कमनीयतावा
नर्थः तथा च सोऽहं त्रिकालाभिन्नरमणीयनारीवानित्यर्थः कर्मणा यमभिप्रैति स संप्रदानमिति पाणिनिसूत्रे तत्
क्रियाकरणीभूतेन तत्क्रियाकर्मणा यं संबंधीकर्तुमभिप्रैति स तत्क्रियातत्कर्मजन्यफलभागित्वेनोद्देश्यो भूतो
ति स संप्रदानमिति सूत्रार्थः एवं करणीभूततत्कर्मजन्यविभागित्वेनोद्देश्यत्वं संप्रदानत्वमिति नियमे वसिते
ग्रामं गच्छतीत्यत्र गमनकर्मग्रामजन्यसुखादिफलभागित्वेनोद्देश्यत्वस्य चैत्रादेः तत्क्रियायां संप्रदा
नत्वाभावात् तद्वारणाय तत्करणीभूतेति तत्र गमने ग्रामस्याकरणत्वात् दानादौ च देयादिकरणमिति
लक्षणसमन्वयः विप्राय गां ददातीत्यादौ जन्यफलप्रकारकेच्छापूर्वकत्वं च तुर्थ्यर्थः कुत्रचित्तिवोचिन्त्यास्य
तदेकदेशे जन्यत्वे अप्रकृत्यर्थस्यापि कर्मणो गवादेर्निरूपकतासंबंधेनान्वयः स्वस्वत्वध्वंसपूर्वकपर
स्वत्वोत्पत्त्यवच्छिन्नत्यागो ददात्यर्थः कृतिराख्यातार्थः एवं च विप्रविषयकगोजन्यफलप्रकारकेच्छापू
र्वकगोवृत्तिस्वस्वत्वध्वंसपूर्वकपरस्वत्वोत्पत्त्यवच्छिन्नत्यागानुकूलकृतिमानित्यन्वयधीः पितृस्वर्गमुद्दिश्य कृते
गोदाने च दानजन्यफलभागित्वेन पितुरुद्देश्यो न तु गोजन्यफलभागित्वेनेति पित्रादेर्न संप्रदानत्वं यदि च
गोः पितुः स्वर्गमुत्पादयिष्यतीति अभिसंधिना दा [redacted] प्रदद्यात् तदा तादृशकर्म
जन्यत्ववाच्ये केचित्तु धात्वर्थतावच्छेदकत्वेन फलं विशेष्यनिरूपितत्वेन इच्छाविषयत्वं चतुर्थ्यर्थः स च धात्व

र्थ

राम:

८

र्थतावच्छेदके अन्वेति इत्थं च विप्रनिरूपितत्वेन इच्छाविषयगोवृत्तिस्वस्वत्वध्वंसपूर्वकपरस्वत्वोत्पत्त्यवच्छिन्नत्या
गानुकूलकृतिमानित्यन्वयधीः जन्यस्वत्वस्य गोवृत्तित्वे लब्धे प्रथीलजन्यत्वं लभ्यते एवं तादृशगोजन्य
स्वत्वनिरूपकत्वेन उद्देश्यत्वं विप्रस्याक्षतं एवं च वृक्षायोदकमासिंचतीत्यादौ संयोगावच्छिन्नद्रवद्रव्य
क्रियावच्छिन्नव्यापारो [redacted] धात्वर्थः वृत्तित्वेन इच्छाविषयत्वं चतुर्थ्यर्थः स च धात्वर्थतावच्छेद
कतावच्छेदकसंयोगान्वयि वृत्तित्वरूपद्वितीयार्थोऽपि तादृशद्रवद्रव्यक्रियान्वयि एवं च वृत्तित्वेन इच्छाविष
यसंयोगानुकूलजलवृत्तिद्रवद्रव्यक्रियावच्छिन्नव्यापारानुकूलकृतिमानित्यन्वयबोधः न चैवं सिचधात्व
र्थतावच्छेदकद्रवद्रव्यक्रियायां द्वितीयार्थवृत्तित्वान्वये पयसा वृक्षमासिंचतीति न स्यात् तादृशक्रियायां वृक्षा पा
पा वृत्तित्वादिति वाच्यं तत्र संयोगावच्छिन्नद्रवद्रव्यक्रियाया एव धात्वर्थतया तदवच्छेदकीभूतसंयोगे एव वृक्ष
वृत्तित्वान्वयात् द्रवद्रव्यसंयोग एव तत्र धात्वर्थ इति न पूर्वोक्त तथा सति फलावच्छिन्नव्यापारबोधकत्वेन धातो
स्कर्मकत्वे धात्वर्थतावच्छेदकद्रव्यक्रियारूपफलशालित्वाभावेन वृक्षादेरकर्मत्वापत्तेः अत एव गां ग्रामं नय
तीत्यत्र द्विकर्मकत्वं संयोगावच्छिन्नद्रवद्रव्यक्रियार्थत्वेन तदवच्छेदकफलद्वयाभावात् तादृशक्रियावच्छि
न्नव्यापारार्थत्वे तु तादृशक्रियायामेव द्वितीयार्थवृत्तित्वान्वयात् जलवृत्तिद्रवद्रव्यक्रियायां वृक्षवृ

तथा च तत्तत्समभिव्याहारस्थलेषु सप्तम्यर्थकत्वादिति भावः २२

संप्रदानत्वं त्यागविशेषणश्चात्र ग्राह्यः। तेन विक्रयादौ क्रेत्रादेर्न संप्र॰ दानता श्राद्धादौ पित्रादेर्न स्वत्वभागित्वेनोद्देश्यत्वं ४७

त्वान्वयाभावादिति कृत्वा न कर्मत्वं विवक्षतस्येह तत्क्रियावच्छेदकसंयोगे च चतुर्थ्यर्थत्वाद्देश्यत्वस्यैवान्वयात्
फलवत्त्वेन तथात्वसुक्तिकल्पनीत् न चैवमर्जुनं यगिग्रामभित्यादौ ग्रामस्य संप्रदानत्वापत्तिः तत्र हि संयोगावच्छि
न्नगमनानुकूलव्यापारः प्रेरणादिर्धात्वर्थः द्वितीयाद्वयस्य वृत्तित्वमर्थः आलम्बनावच्छेदकगमनैकदेशसंयो
गे ग्रामपदोत्तरद्वितीयार्थस्य गमने च आपदोत्तरद्वितीयार्थस्य वृत्तित्वस्यान्वयः एवं च ग्रामवृत्तिसंयोगजन
काजावृत्तिगमनावच्छिन्नव्यापारानुकूलकृतिमानित्यन्वयधीः तथा च जाजन्यफलभागित्वेनोद्देश्यत्वेन ग्रा
त मस्याप्रत्यायनं संप्रदानता यत्र तु चतुर्थ्युद्देश्यत्वं विवक्षितेन तदा ग्रामाय जां नयतीति प्रयोगो भवत्येवेत्याहुः वस्तु॰ ती
तस्तु त्यक्तुं त्यज्यमानद्रव्यस्य स्वत्वभागित्वेनोद्देश्यत्वं किंतु प्रीतिभागितयेति अत एव संप्रदासंमेवान्न न
मः स्वस्तीत्यादिना सूत्रेण चतुर्थी विधानं कृष्णाय गां ददातीत्यादौ [redacted] कृष्णादेः स्वत्वभागित्वेनोद्देश्यत्वं कर्मणेत्यादिसूत्रमपि एतत्परतयैव व्या
ख्येयमिति कर्मणा यमभिप्रैति स्वत्वभागित्वेनोद्देशीकरोति तत्संप्रदानं एवं च यस्मै संप्रदीयते अनेनेति
व्युत्पत्त्या संप्रदानसंज्ञाप्यन्वर्थे विवक्षायां दकमालिञ्चतीत्यादौ संप्रदानप्रयोगो गौणः चतुर्थी प्राप्त्यर्थः अ
त एव शास्त्रे अस्तमुचाति मित्राय दूतं प्रेरयतीत्यादौ धात्वर्थतावच्छेदकफलोद्देश्यत्वाभावेपि चतुर्थी
प्रयोग उत्पद्यते प्राणविभागानुकूलक्रियावच्छिन्नव्यापारो मोचनं गमनानुकूलक्रियानुकूलव्यापार रामः ९

प्रेरणं तदवच्छेदकविभागसंयोगशालित्वेन शत्रुमित्रयोरुद्देश्यत्वात् तथा च तत्रोदकादिजन्यफलवादिष्य
त्वजन्यदुःखादिदूतजन्यवार्तालापादिफलशालित्वेनोद्देश्यत्वमेव चतुर्थ्यर्थः न चैवं गुरुप्रीतिमुद्दिश्य गुरु
पुत्राय दक्षिणं गुरवे ददातीत्यापत्तिः तथाविवक्षायामिष्टत्वात् अत एव यत्र रजकसंबंधित्वमात्रतात्पर्यविषयस्तत्र
रजकस्य वस्त्रं ददातीति प्रयोगः यत्र वस्त्रजन्यफलभागित्वेनोद्देश्यत्वं तात्पर्यविषयः तत्र रजकाय वस्त्रं ददा
तीति प्रयोगो भवत्येव न चैवं श्राद्धेऽपि पित्रादेः प्रीतिभागितयोद्देश्यत्वाद्गौणसंप्रदानत्वेन संप्रदाने
चतुर्थ्यापत्तिः नमः स्वस्तीत्यादिसूत्रेण नरं यथैमिति वाच्यं यत् किंचित्क्रियाजन्यफलभागित्वेनोद्देश्य
त्वस्यैव गौणसंप्रदानत्वेन नमः पदादिक्रियात्वाभावेन तथाकृत्सूत्रप्रणयनात् नारदाय रोचते कलहः वे
श्याय शतं धारयतीत्यादौ तु नारदादेर्न संप्रदानता किंतु रुच्यर्थानां प्रीयमाणः धारेरुत्तमर्ण इति सूत्रद्वये
न संबंधमात्रे चतुर्थी विधीयते तत्र चतुर्थ्यसिंबंधो धातुना चिरख्यातेन विषयता भिधीयते नारदस्य त
चिविषयः कलहः इत्यादि पुनर्दानमंगीकृत्य द्रव्यग्रहणे धारणे वेश्यैः शतकर्मकग्रहणं इत्यादि स्व
निचोत्यस्यान्वयधीः संप्रदानस्य कारकत्वं धात्वर्थतावच्छेदकफलवत्त्वनिष्पादकतया ददस्वेत्यनुमतिप्र
काशनेन कर्तुरिच्छामुत्पाद्य दाननिष्पादनेन वेति त्यागजन्यस्वत्वजनकस्वीकारत्वं संप्रदानत्वं श्राद्धादौ पित्रादे
र्न स्वीकारः कृष्णाय गां ददातीत्यादावपि संप्रदानत्वं गौणं उद्देश्यत्वस्वरूपमित्यप्याहुः परकीयक्रियाजन्यावि

भाग। आश्रयत्वमपादानत्वं वृक्षात्पर्णं पततीत्यादौ पतनाश्रयस्य पर्णादेरपादानत्ववारणाय परकीयेति
अत्र पंचम्या विभागजनकत्वमन्योन्याभावप्रतियोगितावच्छेदकं चाभिधीयते। विभागे अन्योन्याभावे च वृ
क्षो ऽधिकरणत्वेनान्वीयते एवं च वृक्षवृत्ति विभागजनकवृक्षवृत्त्यन्योन्याभावप्रतियोगितावच्छेदकतया
पतनाश्रयः पर्णमित्यन्वयधीः। अत्र च धात्वर्थतानवच्छेदकत्वेन विभागो विशेष्यः तेन वृक्षं त्यजति खग
इत्यादौ वृक्षस्य नापादानत्वं यत्र विभागावच्छिन्नक्रियात्यजधात्वर्थेन या विभागविशिष्टक्रियाजन्य पा
फलत्वाभावान्न तथात्वमिति तदसत्। तथा सत्यधः संयोगावच्छिन्नक्रियाया एव पतिधात्वर्थेन या वृक्षपर्णविभा
गपर्णाधः संयोगस्याजनकत्वादसंभवापत्तेः तदुपलक्षितजन्यत्वे चोभयत्र समानमिति। एवं च ग्रामादा
गच्छतीत्यादौ गमनादिजन्यविभागाश्रयत्वेन ग्रामादेरपादानत्वं ध्रुवमपायेपादानमिति पाणिनिसूत्रं।
अपायो विभागो ध्रुवं निश्चितं तद्विभागजनकक्रियाशून्यत्वमिति तदर्थः। धावतोश्वात्पततीत्यादौ तु पंचमीति द
न तत्सूत्रेणानुशिष्टा तदर्थवक्तव्यो तरं विधेयं नत्वत्र तत्र विभागजनकत्वं यत्र क्रियायामन्वीयते तत्क्रियाशून्यत्व
मर्थः तेन धावतो ऽश्वात्पततीत्यादौ न काप्यनुपपत्तिः अत्र पतनक्रियामिव पंचम्यर्थविभागान्वयेनाश्ववृत्तिधा पा
न वनक्रियायां तदन्वयादिति विभागो ध्रुवमवधीभूतमित्यर्थः अवधित्वं च स्वरूपसंबंधविशेषः प्रतीतिबला
त्कस्यचित् तेन धावतो ऽश्वात्पततीत्यादौ सक्रियाश्वादेरपादानत्वं नानुपपन्नं अत एव वृक्षपर्णयोः क्रियया पर्ण राम
१०

स्य विभागे ऽपि वृक्षस्यावधित्वोपपत्तिरिति तु काश्चित्। वृक्षाद्विभजन इत्यादौ तु विभागावधित्वमपादानत्वं अ
वधित्वमवधिमत्त्वं च स्वरूपसंबंधः पंचम्यर्थः एवं च वृक्षावधिकविभागाश्रयं पर्णमित्यन्वयबोधः न चैवं
वृक्षमाद्विभजन इत्यपि स्यादिति वाच्यं स्वप्रतियोगित्वविशिष्टसंयोगस्यैव स्वावधिकत्वविशिष्टविभाग
आश्रयत्वस्य स्वस्मिन्नभावात्। इत्थं चापादानपदं पंचमीपदं च नानार्थमेवेति। न चैवं परकीयस्पंदन्यविभा ज
गाश्रयत्वेन वृक्षात्पर्णं स्पंदत इति स्यादिति वाच्यं परकीयत्वं क्रिये त्यत्र क्रियापदेन सकर्मकधात्वर्थस्य विवक्षि
तत्वात्। व्याघ्राद्विभेति शत्रोः परित्रायत इत्यादौ पंचमीनापादाने किंतु भीत्रार्थानां भयहेतुरिति सूत्रेणानुशिष्टा
याः पंचम्या हेतुत्वमर्थः धातोर्यथाप्रथमं भयं भयाभावश्चार्थः पंचम्यर्थश्च हेतुत्वं धात्वर्थे भये अभावत्वतावा
च्छेदके च भये अन्वेति। आख्यातार्थ आश्रयत्वं। परित्राणानुकूलव्यापारश्च इत्थं च हेतुपंचम्यैवोपपत्तौ पृथक्
सूत्रप्रणयनं तस्यैव प्रपंचार्थमिति तथा च व्याघ्रहेतुकभयाश्रयः शत्रुहेतुकभयाभावानुकूलव्यापारवानिति
चान्वयधीः एवं कूपादंधं वारयतीत्यादौ पंचम्याः पतनं द्वितीयाया धात्वर्थैकदेशप्रतिबंधान्वितवृत्तित्वं धा
त्वर्थः पतिप्रतिबंधानुकूलव्यापारोर्थः तथा चांधवृत्तिकूपपतनप्रतिबंधानुकूलव्यापारानुकूलकृतिमानिति वा कृपार्थ
स्तत्र तु कूपः स्वकूपेवस्यापि पतनमसिद्धं तत्रासंभवात्। अत एव द्वितीयायाः पतनं पंचम्या धात्वर्थान्व

यित्वत्वंधातोरभाभावानुकूलव्यापारोर्थः तथाचकूपवृत्त्यंधपतनाभावानुकूलव्यापारविषयकयत्नवानित्य
र्थोपिनयुक्तः यदंधस्यपतनमप्रसिद्धंतत्रासंभवात् किंतुधातोरभावानुकूलव्यापारः पंचम्यार्थवृत्तित्वंद्वितीया
याः प्रतियोगित्वमनुयोगित्वंनाधात्वर्थतावच्छेदकीभूताभावान्वितमर्थः अभावंकूपादिसमभिव्याहार
द्विवशात्पतनादिनासंबंधेनबोध्यः एवंचपतनादिसंबंधेनकूपवृत्त्यंधप्रतियोगिकाभावानुकूलव्यापारवि
षयकयत्नवानित्यन्वयधीः एतस्मात्सविषान्नादसुमित्रंवारयतीत्यादौयत्सविषान्नस्ययन्मित्रस्यचभोज
नमप्रसिद्धंतत्रापिभोजनादिसंबंधेनसविषान्नवृत्तिमित्रप्रतियोगिकाभावानुकूलव्यापारविषयकयत्नवानि
त्यन्वयधीः कूपादंधमित्यत्रसविषान्नादसुमित्रमित्यत्रचयथायथंधातोः पतनंभोजनमभावानुकूलव्यापार
श्चार्थः पंचम्याश्चयथायथंस्वार्थवृत्तित्वादिद्वितीयार्थकर्तृत्वान्वितद्वित्वविशिष्टवृत्तित्वंकर्मत्वंचार्थः द्वितीया
याकर्तृत्वमर्थः धात्वर्थतावच्छेदकीभूतेचाभावेधात्वर्थस्यपतनादेरधिकरणत्वेनद्वित्वावच्छिन्नस्यपंचम्यर्थ
वृत्तित्वा[illegible]दिद्वितीयार्थोभयस्यचप्रतियोगित्वेनान्वयोव्युत्पत्तिवैचित्र्यात् एवंचपतनसामान्येकूपवृत्ति
त्वांधकर्तृकत्वोभयाभावानुकूलव्यापारविषयकयत्नवानित्याद्यस्यभोजनसामान्येसविषयफलकर्मत्व
मित्रकर्तृकत्वोभयाभावानुकूलव्यापारविषयकयत्नवानितिद्वितीयस्यबोधः एवमेवाकाशेनपश्य रामः

११

वा
तिघटइत्यादावाकाशविषयकदर्शनस्यघटवृत्तिदर्शनस्यचाप्रसिद्ध्यावक्ष्यमाणरीत्या अन्वयबोधोद्रष्टव्यः इति
तत्रद्वितीयायाविषयित्वरूपकर्मत्वंलक्षणयाचवृत्तित्वंद्वित्वंबोध्यते धातुर्नचालौकिकभिन्नजन्यप्रत्यक्षंत
त्रैवद्वित्वावच्छिन्नद्वितीयार्थान्वितनञर्थस्यान्वयः आख्यातस्यनाश्रयोभयाभावान्वितनिरूपकत्वमर्थः तथाचा भा
लौकिकभिन्नजन्यप्रत्यक्षसामान्यवत्याकाशविषयित्वघटवृत्तित्वोभयाभावनिरूपकोघटइत्यन्वयबो भ
धः नचाकाशंनपश्यत्यभावइत्यादौसमवायसंबंधेनाभाववृत्तित्वाप्रसिद्ध्यानोक्तक्रमेणसमंजसमितिवा
च्यं तत्रहिधातोर्निरूढलौकिकप्रत्यक्षप्रतियोगित्वंसमवायश्चार्थः द्वितीयायाश्चविषयिप्रतियोगित्वमभा
वानुयोगिकत्वंचित्वंचार्थः एकदेशेचविषयत्वेप्रकृत्यर्थस्याकाशादेर्निरूपकत्वेनान्वयः तथाचसमवायसंबं
धसामान्येआकाशविषयिप्रतियोगिकत्वनिरूढलौकिकप्रत्यक्षप्रतियोगिकत्वाभावानुयोगिकत्वैतत्त्रि
त्वावच्छिन्नस्ययोभावस्तन्निरूपकोभावइत्यन्वयः केचित्तुतत्रधातोर्निरूढलौकिकप्रत्यक्षसमवायोर्थः।
द्वितीयायाश्चविषयिप्रतियोगिकत्वमभावानुयोगिकत्वंद्वित्वंचार्थः विषयत्वेचएकदेशेप्रकृत्यर्थस्याकाश
स्यनिरूपकतया अन्वयः तथाचनिरूढलौकिकप्रत्यक्षसमवायेआकाशविषयिप्रतियोगिकत्वाभावा
नुयोगिकत्वोभयत्वावच्छिन्नस्ययोऽभावस्तन्निरूपकोऽभावइत्यन्वयबोधः अनयैवदिशाप्रसिद्धस्थलेबो

८

धाद्विष्टव्यादित्यपि वदंति हिमवतो गंगा प्रभवति इत्यादौ पंचम्या हेतुत्वं धातुना चोत्पत्तिर्बोध्यते तथा सति
जनिकर्तुः प्रकृतिरित्यनेनोपपदीभुवः प्रभव इति सूत्रप्रणयनवैयर्थ्यात् किंतु प्रकर्षेण भवनं प्रभवपदार्थः आ
द्यबहिःसंयोग इति यावत् सएव धात्वर्थः बहिःपदार्थः प्रकृते भूखंडमेव पंचम्यर्थः संयोगध्वंसाव्यवहितोत्त
रकालित्वमाख्यातार्थ आश्रयता तथाच हिमालयसंयोगध्वंसाव्यवहितोत्तरक्षणवृत्त्याद्यबहिर्भूसंयोगाश्रय
तावती गंगेत्यन्वयधीः वैकुंठात्काशीतो वा गंगा प्रभवतीत्यप्रयोगात् अव्यवहितोत्तरत्वादेस्तिच वैकुंठसंयोग
ध्वंसाव्यवहितोत्तरक्षणे भूसंबंधस्य काशीसंयोगध्वंसाव्यवहितक्षणेचाद्यस्य तस्याभावात् वल्मीकाद्गं
गा प्रभवति धनुः खंडमाखंडलस्येत्यादावपि एवमेव धात्वर्थः परंतु वल्मीकात्प्रक्षोवहिःपदार्थ इति विशे
शु षः शिशुपालाद्युध्यमानात्पराजयते रण इत्यादौ च धातोरसहिष्णुता पंचम्याः कर्मत्वमाश्रयत्वमाख्यातार्थः गोर्धदेश
श्रीकृष्णेन सह तेऽध्ययनं न सहते इति तदर्थविवरणात् असहिष्णुता द्वेषविशेषोऽभिभवाशक्यत्वज्ञानं
अशक्यत्वज्ञानं वा इत्थंच श्रीकृष्णविषयकद्वेषवान् श्रीकृष्णविषयकाभिभवाशक्यत्वज्ञान् [redacted]
वा चाद्यत्याद्यस्य युद्धविषयकाशक्यत्वज्ञानवानित्यं त्वयस्य बोधः विप्राद्धनमादत्ते इत्यादौ पंचम्यायः
धौ घेष्टविनियोगो न तु स्वत्वं चोराद्धनमादत्ते इत्यादौ चोरस्य स्वत्वाभावेन तदसंभवात् धातोरपि यथेष्टविनियो राम:

दृश्मात्पराजयते शिशुपालः अध्ययनात्पराजयते बाल इत्यादौ तु ५ १२

क

फलस्वीकारोर्थो न तु स्वत्वजनकः स्वीकारः विप्राद्धनमादत्ते चोर इत्यादौ चोरस्य तदसंभवात् पंचम्यर्थविनियोग
स्य चाव्यवहितोत्तरत्वसंबंधेन धात्वर्थतावच्छेदकविनियोगेऽन्वयः अव्यवहितोत्तरत्वंच स्वसमानविषयकपुरुषां
तरीयविनियोगाव्यवहितभिन्नत्वं तेन भ्रष्टः प्रतिग्रहसविप्रेण दत्तं धनमादानरि भ्रष्टाद्दादत्ते इति न प्रयोगः इत्थं
च विप्रीयधेष्टविनियोगाव्यवहितोत्तरधनवृत्तियथेष्टविनियोगफलकस्वीकारवान् इत्यन्वयबोधः अधर्मा
ज्जुगुप्सते इत्यत्र पंचम्याः कर्मत्वं धातोर्निंदार्थः अधर्मं निंदतीत्यर्थः अधर्माद्विरमतीत्यादौ धातोः करणानंतरम
करणं पंचम्याः कर्मत्वमर्थः सच करणेचान्वेति अधर्मं कृत्वा पुनर्न करोतीत्यर्थः एवं धर्मात्प्रमाद्यतीत्यादौ पंचम्या
तो विषयित्वं धातोरनवधानं आख्यातस्य चाश्रयत्वमर्थः धर्मविषयकानवधानाश्रय इति शाब्दधीः उपाध्यायादंतर्ध
त्ते शिष्य इत्यादौ धातोः स्वविषयकप्रत्यक्षविरोधिव्यापारः पंचम्याः संबंधित्वं धात्वर्थतावच्छेदकप्रत्यक्षान्वितमा
ख्यातस्य कृतिरर्थः उपाध्यायसंबंधिस्वविषयकप्रत्यक्षविरोधिव्यापारानुकूलकृतिमानिति चान्वयधीः दं
डाद्घटः धूमाद्वह्निमानित्यादौ पंचम्या नापादानेति क्रियायोगाभावात् किंतु जनकत्वज्ञापकत्वरूपं जन्यत्व
ज्ञाप्यत्वं वा हेतुहेतुमत्त्वे वा हेतौ विभक्तिसूत्रेणानुशिष्टा नचैवं जनिकर्तुः प्रकृतिरिति सूत्रवैयर्थ्यं काष्ठात्पचती
त्यत्र वह्निर्जायत इत्यादावपि उत्पत्तिरूपधात्वर्थनिरूपितहेतुत्वस्यापि हेतौ विभक्तिसूत्रेणैव संभवादिति वा

यो उत्पत्तेरहेतुकत्वेपि सावधिकत्वादुत्पत्तिनिरूपितता दृशास्वरूपसंबंधस्य हेतुत्वादन्यत्वेनहेतावि निरूपितेणापं
चम्याः अभावात् । अधिकरणत्वं च न धर्मसंबंधः संबंधस्य संयोगादिरूपस्य द्विष्ठत्वात् बदरादेरपि कुंडाधारतापत्तेः
२ न च कुंडं न बदरं धर्म इति वाच्यं नहि स्वधर्मसंबंधोऽधिकरणत्वं पर्यवसितं स्वधर्मत्वं चास्याधेयत्वं । त्वाधेयत्वं च यदि
स्वनिरूपितताधिकरणसंबंधित्वं तदान्योन्याश्रयः अन्यच्चाद्रुवचं नापि उत्पत्त्याश्रयस्थितिप्रयोजकप्रयोजकत्वं च अपेक्षणीयमधि
करणं उत्पत्त्ये अपेक्षणीयं च कार्यस्य समवायिकारणं स्थित्यये घटादेर्भूतलादिं तत्प्रयोजकत्वात् । आदेः समवायि अना
वसमवाययोः स्वरूपसंबंधीनि वाच्यं अपेक्षणीयत्वं हि जनकत्वं अतो डिजात्याद्यतिव्याप्तेः तस्य लौकिकप्रत्य
क्षाभावे संनिकर्षघटकत्वेन जनकत्वात् हृदादेर्घटाद्यधिकरणतापत्तेश्च नाप्यधिकरणत्वं आत्माश्रयात् नापतत उत्पत्त्येधिकरणत्वे नापेक्षणीयत्वमित्यर्थः ६
द्विन्नत्वे सति तत्पतनप्रतिबंधकसंयोगवत्त्वं भूतलेत्वं पतनवद्द्रव्यस्याधिकरणत्वं अत एव पंकजकोरकान्तरोत्पन्न
विनष्टभ्रमरस्याप्यधिकरणे पतनाप्रसिद्ध्यानाव्याप्तिः गुणक्रियाजात्यादेश्च तत्समवायित्वमित्याद्यभावसम
वायानो चन स्वरूपसंबंधित्वं एवं परंपरासंबंधेनापि निर्वाच्यमिति वाच्यं अननुगमात् भूतले घट इत्यादौ उक्त
रूपेण सप्तम्यर्थतायां गौरवात् अननु भवाच्च किंतु प्रतियोगित्वानुयोगित्वाधेयत्वाधिकरणत्वे च विलक्षण
प्रतीतिसाक्षिकः स्वरूपसंबंधविशेषः स चातिरिक्तोऽनतिरिक्तो वेत्यन्यदेतत् तत्र गेहे पचतीत्यत्र पाकस्या रामः

पतनवद्द्रव्यस्याधिकरणत्वम् ×५ १३

वे

धःसंतापनस्य साक्षाद्देहावृत्तित्वेपि कर्तृघटितपरंपरया अधिकरणत्वमाधेयत्वं । वापाकादिक्रियाश्रितं सप्तम्यर्थः
स्थाल्यामोदनं पचतीत्यत्राधःसंतापनस्य पाकस्य साक्षात् स्थाल्यां वृत्तित्वेपि कर्मघटितपरंपरया अधिकरणत्वमा
धेयत्वं वा सप्तम्यर्थः पाकादावन्वेति अत एव तुभयत्वेनान्वयेव्युत्पत्तिरिति वृद्धाः नव्यास्तु कर्तृकर्मव्यवहितामसा
क्षात् धारयत् क्रियां उपकुर्वत् क्रियाशक्तिकोशात्तो अधिकरणं स्मृतं इति एवं च कर्तृकर्मान्यतरद्वारा क्रियाश्रयत्वे
सति तत्क्रियोपकारकं अधिकरणमिति वस्तुतस्तु परंपरया क्रियाश्रयत्वमेवाधिकरत्वं अत एव प्रांगणस्थेन दी
र्घदंडाग्निना काष्ठादिचालनक्रियावत्त्वेन गृहांतर्वर्तिपाककरणे कर्तृद्वारा क्रियानाश्रयत्वेपि गृहस्य गेहे पचतीति
प्रयोगः न चैवं परंपरयेति व्यर्थं अधःसंतापनं अग्नौ वह्निसंयोगानुकूलकाष्ठवह्न्यादिव्यापारस्तस्य च साक्षात्ती
ष्टवह्न्यादिवृत्तित्वेपि काष्ठे वह्नौ वा पचतीति प्रयोगाभावात् स्यधि गच्छतीति वक्तव्यत्वास्ति नगरं गच्छतीति प्रयोगाभावाद ती
पि तत्पदमिति न चैवं क्रियानिरूपिताधिकरणत्वस्यैव सर्वत्र सप्तम्यर्थत्वे विना क्रियायोगं भूतले घट इत्यादिप्र
योगानस्यादिति वाच्यं इष्टत्वादिति वैयाकरणाः अधिकरणत्वमाधेयत्वं वा सप्तम्यर्थः स च यत्र क्रियान्वयी तत्र
कारकत्वव्यवहारः अत एव भूतले घट इत्यादौ क्रियाश्रव्यवाक्यात् भूतलादौ यो घट इति शाब्दबोधो भव
त्येवेति न्यायविदः गेहस्थाल्यामोदनं पचतीत्यत्र निरूढसंबंधेन गेहाधिकरणकस्थाल्यधिकरणोदन

रा

कर्मकपाकानुकूलकृतिमान्निरन्वयधीः भूतले घट इत्यादौ सप्तम्या अधिकरणमर्थः तत्र च प्रकृत्यर्थस्याश्रयत्वे
न प्रधमानार्थस्य च निरूपकत्वेनान्वयः भूतलनिष्ठाधिकरणतानिरूपको घट इत्यन्वयबोध इति प्राचः निरूप
कत्वादिः संबंधस्य प्रतियोगितावच्छेदकत्वाभावात् नयथान्वयानुपपत्त्याधेयत्वं सप्तम्यर्थः तत्र च प्रकृत्यर्थस्य निरू
पितत्वया प्रथमानार्थस्य चाधिकरणतयान्वये भूतलनिरूपिताधेयत्ववान् घट इत्यन्वयबोध इति नव्याः चर्म
णि द्वीपिनं हंतीत्यादौ निमित्तसप्तमी निमित्तत्वमुद्देश्यत्वं तच्च फलत्वेन फलवत्त्वेन वा इच्छाविषयत्वं प्रथमेम
शकनिवृत्तौ धूमं करोतीति द्वितीये तु चर्मणि द्वीपिनं हंतीत्यादि चर्मादेः सिद्धत्वादिच्छाविषयत्वाभावेपि साधी
भूतयत्किंचिद्विनियोगरूपफलवत्त्वेन उद्देश्यत्वात् अत्र च यथायथं तादृशेच्छा सप्तम्यर्थः तस्याश्च धात्वर्थे प्र
योज्यत्वसंबंधेनान्वयः तथा च मशकनिवृत्तिविषयकेच्छाप्रयोज्यधूमकरणमाश्रयः चर्मविषयकयथेष्टविनि
योगप्रकारकेच्छाप्रयोज्यद्वीपिकर्मकहननानुकूलकृतिमानिति क्रमेणान्वयबोधः अत्र च निमित्तात्कर्मयोगइ
त्यनुशासनाद्धात्वर्थे चित्कर्मप्रकारकबोधजनकधातुयोगो नियामकः सकर्मकधातोः कर्मसमभिव्याहारेण क
र्मप्रकारकबोधजनकतायथा द्वीपिनं हंतीत्यादौ अकर्मकधातोश्च कर्मविशिष्टस्वार्थशक्त्या अविधाय जनी
क्षये यदुदेतीत्यत्र उदयगिरिशिखरमारोहतीत्यर्थः करणात्कर्मविशिष्टबोधजनकत्वमविशेषः अप्र